# Devaih Kritam 04 Vishnu Stotram

# देवैः कृतं ४ विष्णुस्तोत्रम्

## Document Information

Text title : Devaih Kritam 04 Vishnu Stotram

File name : devaiHkRRitaM04viShNustotram.itx

Category : vishhnu, vishnu, bRRihannAradIyapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 16/54-61||

Latest update : October 26, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 26, 2024

*sanskritdocuments.org*

Devaih Kritam 04 Vishnu Stotram

# देवैः कृतं ४ विष्णुस्तोत्रम्

देवा ऊचुः ।
नताः स्म विष्णुं जगदेकनाथं स्मरत्समस्तार्तिहरं परेशम् ।
स्वभावशुद्धं परिपूर्णभावं वदन्ति यज्ज्ञानतनुं च तज्ज्ञाः ॥ १६-५४॥

ध्येयः सदा योगिवरैर्महात्मा स्वेच्छाशरीरैः कृतदेवकार्यः ।
जगत्स्वरूपो जगदादिनाथस्तस्मै नताः स्मः पुरुषोत्तमाय ॥ १६-५५॥

यनन्नामसङ्कीर्त्तनतो खलानां समस्तपापानि लयं प्रयान्ति ।
तमीशमीड्यं पुरुषं पुराणं नताः स्म विष्णुं पुरुषार्थसिद्ध्यै ॥ १६-५६॥

यत्तेजसा भान्ति दिवाकराद्या नातिक्रमन्त्यस्य कदापि शिक्षाः ।
कालात्मकं तं त्रिदशाधिनाथं नमामहे वै पुरुषार्थरूपम् ॥ १६-५७॥

जगत्करोऽत्यब्जभवोऽत्ति रुद्रः पुनाति लोकाञ्छ्रुतिभिश्च विप्राः ।
तमादिदेवं गुणसन्निधानं सर्वोपदेष्टारमिताः शरण्यम् ॥ १६-५८॥

वरं वरेण्यं मधुकैटभारिं सुरासुराभ्यर्चितपादपीठम् ।
सद्भक्तिसङ्कल्पितसिद्धिहेतुं ज्ञानैकवेद्यं प्रणताः स्म देवम् ॥ १६-५९॥

अनादिमध्यान्तमजं परेशमनाद्यविद्याख्यतमोविनाशम् ।
सच्चित्परानन्दघनस्वरूपं रूपादिहीनं प्रणताः स्म देवम् ॥ १६-६०॥

नारायणं विष्णुमनन्तमीशं पीताम्बरं पद्मभवादिसेव्यम् ।
यज्ञप्रियं यज्ञकरं विशुद्धं नताः स्म सर्वोत्तममव्ययं तम् ॥ १६-६१॥

इति नारदपुराणे पूर्वभागे षोडसाध्यायान्तर्गतं
देवैः कृतं विष्णुस्तोत्रं समाप्तम् ।

बृहन्नारदीयपुराण । पूर्वभाग । अध्याय १६/५४-६१॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 16/54-61..

Proofread by PSA Easwaran

*Devaih Kritam 04 Vishnu Stotram*

pdf was typeset on October 26, 2024

Please send corrections to *sanskrit@cheerful.com*